# Sri Mahasudarshana Ashtottara Shatanama Stotram



सुदर्शनश्चक्रराजस्तेजोव्यूहो महाद्युतिः ।
सहस्रबाहुर्दीप्ताङ्गो ह्यरुणाक्षः प्रतापवान् ॥ १॥
अनेकादित्यसङ्काशः प्रोद्यज्ज्वालाभिरञ्जितः ।
सौदामिनीसहस्राभः मणिकुण्डलशोभितः ॥ २॥
पञ्चभूतमनोरूपो षट्कोणान्तरसंस्थितः ।
हरान्तःकरणोद्भूतरोषभीषणविग्रहः ॥ ३॥
हरिपाणिलसत्पद्मविहारारमनोहरः ।
स्राकाररूपस्सर्वज्ञः सर्वलोकार्चितप्रभुः ॥ ४॥
चतुर्दशसहस्रारः चतुर्वेदमयोऽनलः ।
भक्तचान्द्रमसज्योतिः भवरोगविनाशकः ॥ ५॥
रेफात्मको मकारश्च रक्षोसृग्रूषिताङ्गकः ।
सर्वदैत्यग्रीवनालविभेदनमहागजः ॥ ६॥
भीमदंष्ट्रोज्ज्वलाकारो भीमकर्मा विलोचनः ।
नीलवर्त्मा नित्यसुखो निर्मलश्रीर्निरञ्जनः ॥ ७॥
रक्तमाल्यांबरधरो रक्तचन्दनरूषितः ।

रजोगुणाकृतिश्शूरो रक्षःकुलयमोपमः ॥ ८॥
नित्यक्षेमकरः प्राज्ञः पाषण्डजनखण्डनः ।
नारायणाज्ञानुवर्ती नैगमान्तःप्रकाशकः ॥ ९॥
बलिनन्दनदोर्दण्डखण्डनो विजयाकृतिः ।
मित्रभावी सर्वमयो तमोविध्वंसकस्तथा ॥ १०॥
रजस्सत्त्वतमोद्वर्ती त्रिगुणात्मा त्रिलोकधृत् ।
हरिमायागुणोपेतः अव्ययोऽक्षस्वरूपभाक् ॥ ११॥
परमात्मा परंज्योतिः पञ्चकृत्यपरायणः ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभामयः ॥ १२॥
सदसत्परमः पूर्णो वाङ्मयो वरदोऽच्युतः ।
जीवो गुरुर्हंसरूपः पञ्चाशत्पीठरूपकः ॥ १३॥
मातृकामण्डलाध्यक्षो मधुध्वंसी मनोमयः ।
बुद्धिरूपश्चित्तसाक्षी सारो हंसाक्षरद्वयः ॥ १४॥
मन्त्रयन्त्रप्रभावज्ञो मन्त्रयन्त्रमयो विभुः ।
स्रष्टा क्रियास्पदश्शुद्धः आधारश्चक्ररूपकः ॥ १५॥

निरायुधो ह्यसंरम्भः सर्वायुधसमन्वितः ।

ओङ्काररूपी पूर्णात्मा आंकारस्साध्यबन्धनः ॥ १६॥

ऐंकारो वाक्प्रदो वग्मी श्रींकारैश्वर्यवर्धनः ।

क्लींकारमोहनाकारो हुंफट्क्षोभणाकृतिः ॥ १७॥

इन्द्रार्चितमनोवेगो धरणीभारनाशकः ।

वीराराध्यो विश्वरूपः वैष्णवो विष्णुरूपकः ॥ १८॥

सत्यव्रतः सत्यधरः सत्यधर्मानुषङ्गकः ।

नारायणकृपाव्यूहतेजश्चक्रस्सुदर्शनः ॥ १९॥

sudarśanaścakrarājastejovyūho mahādyutiḥ |
sahasrabāhurdīptāṅgo hyaruṇākṣaḥ pratāpavān || 1||
anekādityasaṅkāśaḥ prodyajjvālābhiranjitaḥ |
saudāminīsahasrābhaḥ maṇikuṇḍalaśobhitaḥ || 2||
pancabhūtamanorūpo ṣaṭkoṇāntarasaṃsthitaḥ |
harāntaḥkaraṇodbhūtaroṣabhīṣaṇavigrahaḥ || 3||
haripāṇilasatpadmavihārāramanoharaḥ |
srākārarūpassarvajnaḥ sarvalokārcitaprabhuḥ || 4||
caturdaśasahasrāraḥ caturvedamayo.analaḥ |

bhaktacāndramasajyotiḥ bhavarogavināśakaḥ || 5||
rephātmako makāraśca rakṣosṛgrūṣitāṅgakaḥ |
sarvadaityagrīvanālavibhedanamahāgajaḥ || 6||
bhīmadaṃṣṭrojjvalākāro bhīmakarmā vilocanaḥ |
nīlavartmā nityasukho nirmalaśrīrniranjanaḥ || 7||
raktamālyāṃbaradharo raktacandanarūṣitaḥ |
rajoguṇākṛtiśśūro rakṣaḥkulayamopamaḥ || 8||
nityakṣemakaraḥ prājnaḥ pāṣaṇḍajanakhaṇḍanaḥ |
nārāyaṇājnānuvartī naigamāntaḥprakāśakaḥ || 9||
balinandanadordaṇḍakhaṇḍano vijayākṛtiḥ |
mitrabhāvī sarvamayo tamovidhvaṃsakastathā || 10||
rajassattvatamodvartī triguṇātmā trilokadhṛt |
harimāyāguṇopetaḥ avyayo.akṣasvarūpabhāk || 11||
paramātmā paraṃjyotiḥ pancakṛtyaparāyaṇaḥ |
jnānaśaktibalaiśvaryavīryatejaḥprabhāmayaḥ || 12||
sadasatparamaḥ pūrṇo vāṅmayo varado.acyutaḥ |
jīvo gururhaṃsarūpaḥ pancāśatpīṭharūpakaḥ || 13||
mātṛkāmaṇḍalādhyakṣo madhudhvaṃsī manomayaḥ |
buddhirūpaścittasākṣī sāro haṃsākṣaradvayaḥ || 14||
mantrayantraprabhāvajno mantrayantramayo vibhuḥ |

sraṣṭā kriyāspadaśśuddhaḥ ādhāraścakrarūpakaḥ || 15||
nirāyudho hyasaṃrambhaḥ sarvāyudhasamanvitaḥ |
oṅkārarūpī pūrṇātmā āṃkārassādhyabandhanaḥ || 16||
aiṃkāro vākprado vagmī śrīṃkāraiśvaryavardhanaḥ |
klīṃkāramohanākāro huṃphaṭkṣobhaṇākṛtiḥ || 17||
indrārcitamanovego dharaṇībhāranāśakaḥ |
vīrārādhyo viśvarūpaḥ vaiṣṇavo viṣṇurūpakaḥ || 18||
satyavrataḥ satyadharaḥ satyadharmānuṣaṅgakaḥ |
nārāyaṇakṛpāvyūhatejaścakrassudarśanaḥ || 19||

|| इति शिवम् ||

www.kamakotimandali.com